International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(4): 86-89
© 2018 IJSR
www.anantaajournal.com
Received: 16-05-2018
Accepted: 17-06-2018

**शिवरामः भाग्वत्**
शोधच्छात्रः कर्नाटक-संस्कृत-विश्वविद्यालयः बेङ्गलूरु, कर्नाटक, भारत

Correspondence
**शिवरामः भाग्वत्**
शोधच्छात्रः कर्नाटक-संस्कृत-विश्वविद्यालयः बेङ्गलूरु, कर्नाटक, भारत

# स्मृतिविषयाणां काव्यात्मकता

**शिवरामः भाग्वत्**

परिभ्रमणशीलजीवात्मनः क्लेशं वीक्ष्य बहोःकालात् आर्द्रहृदयाः ऋषयः स्वज्ञानदीपेन प्रतिभासमानस्याखण्डज्ञानराशिस्वरूपस्य वेदस्य परिचयं जीवात्मनः कर्तव्यपरिज्ञानार्थमभिव्यञ्जनमकार्षन् । वेदो हि विवेकिनामेव न सुकुमारमतीनाम्। अतः करुणाप्रवणमन्वादिमहर्षिणः सर्वसाधारणोपयो गित्वेन धर्मशास्त्रनिर्माणमकार्षन्। अस्मिन् धर्मशास्त्रे प्रायेण वैदिकज्ञान स्मृतेः विद्यमानत्वात् धर्मशासकऋषिभिः स्मृतिशब्देनाभिहितम्। तदेवोक्तं मनुस्मृतौ -

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्व मीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥[1] इति।

भारतीय धर्मशास्त्रे वैदिकधर्मसूत्राणामुपरान्ते स्मृतयो भवन्ति। श्रुतिद्वारेण स्मृतिद्वारेण वा विहिताचारो धर्मः। श्रुतिः श्रवणमननाध्या पनानां विषयिणी। परन्तु स्मृतिः स्मरणविषयिणी। तथा परम्परागतधार्मिक साहित्यग्रन्थोऽपि। सङ्कीर्णार्थे स्मृतिधर्मशास्त्रयोः कोऽपि भेदो नास्ति।

स्वापतेयमधिगम्य धर्मतः पर्यपालयमवीवृधमं च यत्।
तीर्थगामि करवै विधानतस्तज्जुषस्व जुहवानि चाऽनले॥ [2]

राजसूययागं प्रत्यागतं श्रीकृष्णं प्रति धर्मराजस्योक्तिरियम्- हे कृष्ण! इदं धनं शास्त्रोक्तरीत्या सम्पादितं वर्धितञ्च। तथा शास्त्रविधिना ब्राह्मणेषु हवने च विनियोजयामि। अर्थात् अग्नौ समर्पणेन तत् भवन्तमेवोपगच्छतीति भावः। एवं श्लोकस्य सन्दर्भसहितः तात्पर्यार्थः।

अत्र श्लोके धर्मतः स्वापतेयमधिगम्य, अवीवृधं पर्यपालयं विधानतः तीर्थगामि करवै, इत्येते विषयाः धर्मशास्त्रीयाः। तद्यथा याज्ञवल्क्यस्मृतौ-

अलब्धमीहेध्द्दर्मेण लब्धं यत्नेन पालयेत्।
पालितं वर्धयेन्नित्या वृध्दं पात्रेषु निक्षिपेत्॥[3]

अलब्धलाभाय धर्मशास्त्रानुसारेण प्रयतेत। यत्नेन लब्धं तत् रक्षेत्। पालितं नीत्या वृध्दिं नयेत्। वृध्दं च पात्रेषु दद्यात् इति अस्यार्थः। अत्र तु अलब्धमीहेध्द्दर्मेणेत्यस्ति धर्मेणधनप्राप्तिः लोकोपकाराय भवति। यद्यधर्मेण प्रप्तिः तर्हि लोकैः निन्द्यते। धर्मेण प्राप्तं तत् यत्नेन पालयेदित्यस्ति। यदि यत्नेन न पाल्यते तर्हि पूर्वं कृतश्रमः व्यर्थो भवति।
पुनः अत्र तृतीयपादे पालितं वर्धयेन्नीत्येत्यस्ति सत्यमेवात्र पूर्वमलब्धमीहेध्द्दर्मेणेत्यत्र यथा सङ्ग्रहे धर्मः पाल्यते तथैव वर्धनेऽप्यावश्यं पालनीय एव। नो चेत् याज्ञवल्क्यस्मृतावुच्यते -

अन्यायेन नृपो राष्ट्रात्स्वकोशं योभिवर्धयेत्।
सोऽचिराद्विगतश्रीको नाशमेति सबान्धवः॥[4]
इति।

अर्थात् यो राजा स्वराष्ट्रादन्यायेन द्रव्यमादाय स्वकोशमभिवर्धयेत् सोऽचिरात् विगतश्रीको बन्धुभिः सह नाशं प्राप्नोतीति। तथा-

प्रजापीडनसन्तापात्समुद्भूतो हुताशनः। राज्ञः कुलं श्रियं प्राणांश्चाऽदग्ध्वा न निवर्तते॥ [5]
इति।

अर्थात् प्रजानां तस्करादिकृतपीडनेन यः सन्तापः तस्मादुद्भूतो हुताशनेव सन्तापकारित्वादपुण्यराशिः “हुताशन” शब्देनोच्यते। सः राज्ञः कुलं श्रियं प्राणांश्चानाशमनीत्वा नोपशाम्यतीति। तथा चतुर्थे पादे “वृध्दं पात्रेषु निक्षिपेत्” इत्यत्र पात्रविचारो वर्तते। तद्विषये याज्ञवल्क्यस्मृतौ-

न विद्यया केवलया तपसा वापि पात्रता।
यत्र वृत्तिमिमे चोभे तध्दि पात्रं प्रकीर्तितम्॥[6]
इति।

एवं निरूपितमस्ति। केवलया विद्यया श्रुताध्ययनसम्पत्या नैव सम्पूर्णपात्रत्वम्। नापि केवलेन तपसा शमदमादिना वा, अपि तु तपसः विद्यायाश्च मेलनेन पात्रत्वं सिध्यति। पात्रत्वविचारेऽन्यत्र एवं निरूप्यते। “स्वाध्यायाढ्यं शुध्दयोनिं प्रशान्तं वैतानस्थं प्रापभीतं बहुज्ञम्। गोषुक्षान्तं नीतितीक्ष्णं शरण्यं वृत्तग्लानं तादृशं पात्रमाहुः” एवमेते चत्वारः विचाराः निरूपिताः स्मृतौ। परन्त्वत्र प्रकृते मागश्लोके “अनले जुहवानि” “तत् जुषस्व” इति विषयद्वयमधिकतया प्रतिपादितम्। अनलस्य हुताशनत्वादनले जुहवानि यज्ञो वै विष्णुः इत्युक्तप्रकारेण भावनेवेदं स्वीकरोत्विति भावः।
अत्र श्लोके मया धर्मेण सम्पादितं धनं ब्राह्मणेभ्यः दद्मि, वह्नौ जुहोमीति कार्यद्वयं यदुक्तमस्ति तत्र कृष्णं भवन्तमेवोपगच्छतीति धर्मराजस्य भावः। यतो हि –

अस्कन्नमव्यथं चैव प्रायश्चित्तैरदूषितम्।
अग्नैः सकाशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते॥[7]

अग्नेः सकाशादग्निसाध्याद्भूरिदक्षिणाद्राजसूयादेरपि विप्राग्नौ हुतं श्रेष्ठमिहो च्यते। “ब्राह्मणोऽस्य मुखमासीत्” इति श्रुतिवचनेन ब्राह्मणेभ्यः दत्तं दानं नारायणमेवगच्छतीति जानीमः। मुखादिन्द्रश्चाग्निश्चेति श्रुति वाक्येन नारायणादेवाग्नेरुत्पत्तिरभवत्, अग्नेराश्रयः नारायण एवेति।
याज्ञवल्क्यस्मृतौ – ईहेत्, पालयेत्, वर्धयेत्, निक्षिपेत् इत्येवं विधिलिङ्लकारेणान्यैस्मै सूचितमस्ति परन्त्वत्र काव्ये पर्यपालयम्, अवीवृधम्, करवै, जुहवानीत्येतैः

शब्दैः स्वकार्यं धर्मराज आत्मकार्यत्वेन स्वीकृतवान्। तत्र निश्चप्रचं लक्षणत्वेन यदस्ति तदेवात्र स्पष्टतया लक्ष्यत्वेन निरूपितमस्ति। परन्तु स्मृतौ धनं धर्मेण ईहेदित्यस्ति। परन्त्वत्र काव्ये धनं लब्धमस्तीति वर्णितुम्। तथा पात्रेषु निक्षिपेदित्यस्ति स्मृतौ। अत्र तु तीर्थगामि करवै इति ब्राह्मणेभ्यः सत्पात्रेभ्यः दानं करवाणीति सत्पात्राः के इति च निरूपितमस्ति। स्मृतावनले जुहुयादिति नास्त्यत्र तावदनले जुहवानीति धर्मराजस्य विशेषतया स्वाभिप्रायप्रकटनमस्ति। श्रीकृष्णः परमपुरुषः यज्ञनारायणः तस्मात् सर्वदेवनमस्कारः केशवं प्रति गच्छतीत्युक्तिप्रकारेण यथा नमस्कारः केशवं गच्छति तथा सर्वदेवविषयकहविरपि परमपुरुषं कृष्णङ्गच्छतीति भावेनानले विधानतः जुहवानि तत्र भवान् जुषस्वेति धर्मराजस्याभिप्रायः।

स्मृतौ साक्षाद्विधित्वेन निरूपितो विचारोत्र लक्ष्यत्वेन धर्मराजकर्तृकधनकर्मवृत्तान्तसहितत्वेन निरूपित इति स्मृतेरत्र काव्यात्मकता।

यथा पुनः –

प्रव्रज्यावसितो राज्ञो दास आमरणान्तिकम्।
वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः॥ [8]

इति। ब्राह्मणादीनां वर्णानामनुलोम्येन दास्यं ब्राह्मणस्य क्षत्रियादयः, क्षत्रियस्य वैश्यशूद्रौ वैश्यस्य शूद्रेत्येवमानुलोम्येन दासभावो भवति न प्रातिलोम्येन। स्वधर्मत्यागिनः परिव्राजकस्य प्रातिलोम्येनापि दासत्वमिष्यत एव। परन्तु चतुर्ष्वाश्रमेषु ब्रह्मचर्य-गार्हस्थ-वानप्रस्थ-सन्यासेत्यनुक्रक्रमः। यदि कश्चन ब्रह्मचर्यानन्तरं सन्यासाश्रमं स्वीकरोत्यथवानुक्रमेणैव सन्यासाश्रममनुगच्छति तदा सः सन्यासी भवति। यदि सः सन्यासी यद्यवसितो भवति तदामरणान्तिकं राज्ञः दासत्वेन तस्य प्रायश्चित्तं नत्वादौ इति “तात्पर्येण यदि सन्यासात् च्युतो भवति तदामरणान्तं राज्ञः दासो भवेदिति” इममेव विषयं माघः काव्ये सामान्यरूपेण विशेषरूपेण च काव्ये अवर्णयत्।

आरूढः पतित इति स्वसम्भवोऽपि स्वच्छानां
परिहरणीयतामुपैति।
कर्णेभ्यश्च्युतमसितोत्पलं वधूनां
वीचिभिस्तटमनु यन्निरासुरापः॥ [9]

आत्मसम्भवोऽप्युत्तमस्थानगतः भ्रष्ट इति हेतोः त्याज्यत्वमुपैति। यथा स्वसम्भवमपि वधूकर्णेभ्यश्च्युतमुत्पलम् स्ववीचिभिः जलम् दूरीकरोति इति अस्यार्थः। पतितं लोके जनाः दूरीकुर्वन्तीति तात्पर्यार्थः। अत्र विशेषेण सामान्यरूपार्थस्य प्रतिपादनं दृश्यते। अत्र स्मृतौ तावत् वर्णानामानुलोम्येन दास्यं न तु प्रातिलोम्येन। यदि सन्यासी प्रच्युतो भवति तर्हि तस्यामरणान्तं तस्य राज्ञः दास्यं स्वीकरणीयमिति स्पष्टतया विषयः सूचितः। अत्र माघशोके तु स्वसम्भवोऽप्यारूढः पतित इति स्वच्छानां परिहरणीयतामुपैतीतित्याश्रमधर्म चतुष्टयं वर्णधर्मचतुष्टयञ्चोद्दिश्य प्रतिपादितमिति विशेषः। तथा “कर्णेभ्यश्च्युतमासितोत्पलं वधूनां वीचीभिस्तटमनुयन्निरासुरापः” इत्युदाहरणेनसाकं निरूपितमिति विशेषः।

ऋषिभिः शास्त्राणि प्रणीतानि । तेषु शास्त्रेषु काव्यांशाः विद्यन्ते। कवयः तानि शास्त्राण्यपठन्। स्वकाव्येषु शास्त्रविषयानप्यस्थापयन्। ननु अत्र काव्ये शास्त्रविषयनिबन्धनेन कटुत्वं सिध्यतीति चेन्न। मोदकान्तर्निहितकटुकौषध इव कट्वपि विधिनिषेधौ अस्वाद्यौ भवतः। ननु पूर्वोक्तवचनातिरिक्तप्रयोजनाभावे पुनः प्रयुक्तं वचनं पुनरुक्तं भवतीति चेन्न पूर्वोक्तवचनातिरिक्तप्रयोजने सति पुनः प्रयुक्तं वचनं दुषितं न भवति। अतः ये शास्त्रार्थाः काव्येषु प्रतिपद्यन्ते तेषां काव्याङ्गसहकारेणाह्लादोत्पादकसामर्थ्यविशेषसद्भावात् पुनरुक्तत्वं दूरापास्तमेव।

## सन्दर्भ ग्रन्थ सूची


1. मनुस्मृतिः २/१०
2. शिशुपालवधम् १४/९
3. याज्ञवल्क्यस्मृतिः १/३१७
4. यज्ञवल्क्यस्मृतिः १/३४०
5. याज्ञवल्क्यस्मृतिः १/३४१
6. याज्ञवल्क्यस्मृतिः १/२००
7. याज्ञवल्क्यस्मृतिः १/३१६
8. याज्ञवल्क्यस्मृतिः २/१८३
9. शिशुपालवधम् ८/५४